## तृतीयः पाठः

# मम कक्ष्या

## आमुखम्

पठनोपकरणसंबन्धिनां पदानां, आचारोपचारशब्दानां च परिचयनाय आयोजितः पाठः एषः। पठनोपकरण संबन्धिनां वस्तूनां नामानि मातृभाषायां ते जानन्ति एव। अतः चिरपरिचितानां नित्योपयोगिनां केषाञ्चन वस्तूनां परिचायनमेव पाठेनानेन उद्दिष्टम्।

प्रतिदिनम् उपयुज्यमानानां केषञ्चन आचारोपचारशब्दानाम् अपि प्रयोगः अत्र सूचितः। तेषां प्रयोगः अधिकतया करणीयः।

पाठनाम - मम कक्ष्या।

कालांशः - १०

उद्देश्यम् - कक्ष्यासम्बन्धिनां वस्तूनां,उपचारवाचकानां च परिचयः।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| संभाषणम्।<br>चित्रस्थानां पठनोपकरणानां परिचयः।<br>आचारोपचारशब्दानां परिचयः। | संभाषणपठनम्<br>चर्चा, संभाषणावतारणम्<br>पठनोपकरणानां पट्टिकाकरणम्<br>यथोचितं योजनम्। | पठनोपकरणानां संस्कृतनामानि वदति।<br>आचारोपचारवाक्यानि प्रयुङ्क्ते। |

पाठभागप्रवेशाय अध्यापकः एकां घटनां कथयति। राजीवः कक्ष्यायां विलम्बेन आगतः। कक्ष्यायाः कवाटे तिष्ठन् सः कक्ष्यायाः अन्तः अपश्यत्। कक्ष्या आरब्धा। कक्ष्यायाम् अध्यापकः सुधाखण्डेन श्यामफलके लिखति। छात्रेषु केचन लिखन्ति, केचन चार्ट्पत्राणि पश्यन्ति। कक्ष्यायां राजीवः अन्यत् किं किम् अपश्यत्? उत्तरकथनाय अध्यापकः छात्रान् प्रेरयति।

तदा अध्यापकः राजीवम् अपश्यत्। गुरवे नमः इति राजीवः अभिवादयति। अन्तः प्रविश इति अध्यापकः वदति।

**सस्वरवाचनम्।**

अध्यापकः संभाषणांशान् श्यामफलके विलिख्य अनुवाचनाय प्रेरयति। द्वित्रवारं पठित्वा छात्रान् संघीकरोति, प्रतिसंघं त्रयः छात्राः भवेयुः। संघे पाठभागं वाचयितुं निर्दिशति। प्रतिसंघं साहाय्यं करणीयम्। वाचनसमये क्लिष्टानि पदानि आचारोपचारपदानि च अध्यापकः श्यामफलके लिखति। पाठभागस्य वाचनानन्तरं संभाषणरूपेण अवतारयन्तु छात्राः।

**मूल्यनिर्णयसूचिकाः।**

उच्चारणस्फुटता।

आशयावगमः।

**प्रवर्तनम् - १ नामपरिचायनम्।**

**उद्देश्यम् - कक्ष्यासम्बन्धिनां वस्तूनां परिचयः।**



आसन्दः



स्यूतः



लेखनी



सुधाखण्डः



पेटिका



कपाटिका



व्यजनम्



पुस्तकम्



श्यामफलकम्

अध्यापकः कक्ष्यायां विद्यमानानि वस्तूनि प्रदर्शयति (आसन्दः, स्यूतः, सुधाखण्डः, लेखनी, पेटिका, कपाटिका, पुस्तकं, श्यामफलकम्, व्यजनम्) एकैकं प्रदर्श्य तेषां संस्कृतनामानि अध्यापकः उच्चैः पुनः पुनः वदति। तानि श्रुत्वा कथनाय निर्दिशति। श्यामफलके लिखित्वा प्रदर्शयति। श्यामफलकं दृष्ट्वा छात्राः पठन्तु, ततः टिप्पणीपुस्तके लिखन्तु।

**मूल्यनिर्णयसूचिकाः।**

पदपरिचयः।

वस्तूनां नामग्रहणम्।

उचितरीत्या लेखनम्।

**प्रवर्तनम् २ उत्तरलेखनम्।**

**उद्देश्यम् - किं, कुत्र, कति इत्यादीनां प्रश्नवाचकशब्दानां परिचयः।**

पाठपुस्तकस्थानि वाक्यानि अध्यापकः पठति। अनुवाचनाय छात्रान् प्रेरयति। पश्चात् अधोदत्तानां प्रश्नानाम् उत्तराणि छात्राः वदन्तु। उक्तानि अध्यापकः श्यामफलके लिखतु, उच्चैः पठतु। छात्राः श्यामफलकं दृष्ट्वा उच्चैः पठन्तु, पठितानि टिप्पणीपुस्तके लिखन्तु।

यथा - पुस्तकानि कुत्र सन्ति?

पुस्तकानि उत्पीठिकयाः उपरि सन्ति।

कक्ष्यायां कति दीर्घपीठिकाः सन्ति?

कक्ष्यायां द्वे दीर्घपीठिके स्तः।

अध्यापिका किं करोति?

अध्यापिका अध्यापयति।

**मूल्यनिर्णयसूचिकाः।**

आशयग्रहणम्।

लेखनम्।

अवतारणम्।

**प्रवर्तनम् - ३ यथोचितं योजनम्।**

**उद्देश्यम् - चित्राणि निरीक्ष्य तेषां नामानाम् अवगमनम्।**

पुस्तके दत्तानां चित्राणां नामानि अध्यापकः छात्रान् पृच्छति। छात्रैः कथितानि नामानि अध्यापकः श्यामफलके लिखति। लिखितानि पठित्वा अनुपठनाय निर्दिशति। श्यामफलकं दृष्ट्वा

तानि पुस्तकस्थस्य चित्रस्य अधः लेखनाय निर्दिशति। वाताटे दत्तपदानि निरीक्ष्य तत्रैव दत्तैः चित्रैः सह उचितरूपेण सूत्राणां समायोजनं कुर्वन्तु छात्राः।

**मूल्यनिर्णयसूचिका:।**

आशयग्रहणम्।

उचितं योजनम्।

वस्तूनां परिचयः।

**प्रवर्तनम् -४ आकारान्तस्त्रीलिङ्गरूपाणां परिचायनम्।**

अध्यापकः कासांचन आकारान्तस्त्रीलिङ्गशब्दानां प्रथमाविभक्तौ एकवचन- द्विवचन - बहुवचनरूपाणि श्यामफलके विलिख्य प्रदर्शयति, उच्चैः पठति। पदानाम् अनुवाचनाय निर्दिशति। तादृशानाम् अन्येषां आकारान्तस्त्रीलिङ्गशब्दानां कथनाय निर्दिशतु।अन्ते पाठपुस्तकस्थपदानि विलिख्य प्रदर्शयतु। छात्राः पठित्वा टिप्पणीपुस्तके लिखन्तु।

| | | |
|---|---|---|
| बालिका | बालिके | बालिकाः |
| तूलिका | तूलिके | तूलिकाः |
| माला | माले | मालाः |

**अनुबन्धप्रवर्तनम्।**

**पट्टिकाकरणम्।**

अध्यापकः कानिचित् पठनोपकरणानि उत्पीठिकायाः उपरि न्यस्यति । रमेशमाहूय तस्य स्यूते स्थापनाय निर्दिशति। स्यूते स्थापितानां वस्तूनां नामानि छात्राः चार्ट्पत्रं निरीक्ष्य वदतु लिखतु च।

पाठपुस्तकं,टिप्पणीपुस्तकं,लेखनी,मापिका।

**मूल्यनिर्णयसूचिका:।**

आशयबोधः।

वस्तूनां प्रत्यभिज्ञानम्।

**सम्भाषणम्।**

**उद्देश्यम् - उपचारपदानां परिचयः।**

रीना मीना च विद्यालयं गच्छतः। तयोः संभाषणं श्रृणुमः।

रीना - नमस्ते, सुप्रभातम्।

मीना - सुप्रभातम्।

रीना - नूतनं वसनं वा? को विशेषः?

मीना - आम्, अद्य मम जन्मदिनम्।

रीना - जन्मदिनांशंसाः।

मीना - धन्यवादः।

रीना - स्वागतम्।

अध्यापकः संभाषणमिदं चार्ट्पत्रे विलिख्य प्रदर्शयति, संभाषणस्य सन्दर्भं सूचयति, उच्चैः पठति। छात्रद्वयं आहूय संभाषणरूपेण पठनाय निर्दिशति। पठनानन्तरं नमस्ते, सुप्रभातम्, धन्यवादः, स्वागतम् इत्यादीनि पदानि श्यामफलके लिखति, पुनः पुनः वक्ति, छात्रान् वाचयति च।

**मूल्यनिर्णयसूचिकाः।**

अवतारणम्।

उपचारपदानं परिचयः।

**उपचारपदानि**

प्रणामः, सुमध्यह्नः, सुसायाह्नः, शुभरात्रिः, वन्दनम्

कक्ष्यासंबन्धिनां वस्तूनां परिचायनानन्तरं केषाञ्चन लघुवस्तूनां निर्माणमपि कार्यम् इत्येतद् रसावहमेव। कक्ष्यायां परिचिता भवति अवकारकपेटिका (Waste Box) कागदमुपयुज्य अवकारकपेटिकानिर्माणं लघूपकरणनिर्माणे तत्परतां शुचित्वबोधं च उत्पादयति।

चार्ट्पत्रमुपयुज्य अवकरिकानिर्माणं कथमिति अनुबन्धे सूचयति। प्रवृत्तिपरिचयपठनाय नियुक्तानाम् अध्यापकानां साहाय्यमपि अत्र स्वीकार्यम्। (अनुबन्धम् - २)